This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-558

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 558 विषय स्तोत्र
नांव नृसिंहकवचस्तोत्र
लेखक/लिपीकार — MSS
पृष्ठ 8
काळ — पूर्ण/~~अपूर्ण~~

S.S.S-M

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथनृसिंहकवचस्तोत्रप्रारंभः॥श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ अस्यश्रीलक्ष्मीनृसिंहकवच
स्तोत्रमालामंत्रस्य व्यासःप्रल्हादऋषिः श्री
लक्ष्मीनृसिंहोदेवता अनुष्टुप्छंदः श्रीलक्ष्मी
नृसिंहप्रीत्यर्थेजपेविनियोगः अथन्यासः
योगिहृत्पद्मनिवासायअंगुष्ठाभ्यांनमः नृसिं १
हायतर्जनीभ्यां०॥ स्वप्रकाशायमध्यमाभ्यां०॥

सहस्रशीर्षापुरुषइतिअनामिकाभ्यांनमः॥ सोमसूर्या
का ग्निलोचनायकनिष्ठिकाभ्यां०॥ दिव्यास्त्रशोभितभुजायक
रतलकरपृष्ठाभ्यां०॥ एवंहृदयादि॥ भूर्भुवस्वरोमितिदि
ग्बंधः॥ अथध्यानं॥ कर्पूरधामधवलंकटकंगदादिछत्रं
त्रिनेत्रशशिशेखरमंडितास्यं॥ वामांकसंश्रितरमान
यनाभिरामम जाक्षशंखसगदंनृहरिंनमामि॥ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्कृत्य गणाधीशं सर्वविघ्ननिवारणं ॥ नृसिंहक
वचं वक्ष्ये प्रल्हादेनोदितं पुरा ॥ १ ॥ सर्वरक्षाकरं नृणां स
र्वोपद्रवनाशनं ॥ सर्वसंपत्प्रदं चैव स्वर्गमोक्षप्रदाय
कं ॥ २ ॥ ध्यात्वा नृसिंहं देवेशं हेमसिंहासनेस्थितं ॥
विवृतास्यं त्रिनयनं शरदिंदुसमप्रभं ॥ ३ ॥ लक्ष्म्या २
लिंगितवामांगं विभूतिभिरुपासितं ॥ चतुर्भुजं को

मलांगं मणिकुंडलभूषितं ॥ ४ ॥ हारोपशोभितोरस्कं
रत्नकेयूरमुद्रितं ॥ तप्तकांचनसंकाशं पीतनिर्मलवास
सं ॥ ५ ॥ इंद्रादिसुरमौलिस्थ्वरमाणिक्यदीप्तिभिः ॥
विराजितपदद्वंद्वं शंखचक्रगदादिभिः ॥ ६ ॥ गरुत्मता
चविनयास्तूयमानं मुदान्वितं ॥ स्वहृत्कमलसंकाशं कृ
तानुकवचं पठेत् ॥ ७ ॥ नृसिंहो मे शिरः पातु लोकरक्षा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थसंभवः॥ सर्वव्यापी स्तंभवासो भालं मे रक्षिता दृढं॥
॥८॥ नृसिंहो मे दृशौ पातु सोमसूर्याग्निलोचनः॥ श्रुती
मे पातु नृहरिर्मुनिवर्यस्तुतिप्रियः॥९॥ नासां मे सिंह
नादो सौ मुखं लक्ष्मीमुखप्रियः॥ सर्वविद्यानिधिः पातु
नृसिंहो रसनां मम॥१०॥ नृसिंहः पातु मे कंठं सदा प्रह्ला ३
दवंदितः॥ वक्त्रं पातु चंद्रवदनः स्कंधौ भूभारनाशकृत्॥

॥११॥ दिव्यास्त्रशोभितभुजो नृसिंहः पातु मे भुजौ॥ करौ
मे देववरदो नृसिंहः पातु सर्वतः॥१२॥ हृदयं योगिहृत्पद्म
निवासः पातु मे हरिः॥ मध्यं पातु हिरण्याक्षः रक्षःकुक्षिवि
दारणः॥१३॥ नाभिं मे पातु नृहरिः स नाभिः पद्मसंश्छि
तः॥ ब्रह्मांडकोटयः कटयां यस्यासौ पातु मे कटिं॥१४॥
गुह्यं मे पातु गुह्यानां मंत्राणां गुह्यरूपधृक्॥ ऊरू ऊरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जवः पातु जानुनी हरिरूपधृक् ॥१५॥ जंघे पातु धराभा
रहारयो सौनृकेसरि ॥ सुरराज्यप्रदः पातु पादौ मे नृहरिः
स्वयं ॥१६॥ सहस्रशीर्षा पुरुषः पातु मे सर्वतस्तनुं ॥ अ
तः पदं मंत्रपदैः पातु मां सर्वदिक्षु च ॥१७॥ महोग्रः पूर्व
तः पातु महावीरोग्निभागतः ॥ महाविष्णुर्दक्षिणे च म
हाज्वालस्तु निर्ऋतौ ॥१८॥ पश्चिमे पातु सर्वेशो नृसिं ४

हः सर्वतो मुखः ॥ नृसिंहः पातु वायव्ये सौम्ये भीषणविग्र
हः ॥१९॥ ईशान्ये पातु भद्रो मां सर्वमंगलदायकः ॥ अध
ऊर्ध्वस्तथा मध्यं पातु मे भक्तवत्सलः ॥२०॥ संसारादभ
यः पातु मृत्युमृत्युर्नृकेसरी ॥ जले रक्षतु वाराहः स्थले
रक्षतु वामनः ॥२१॥ अटव्यां नारसिंहस्तु सर्वतः पातु
केशवः ॥ इदं नृसिंहकवचं प्रह्लादमुखनिर्गतं ॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तिमान्यः पठेन्नित्यं सर्वपापैः प्रमुच्यते॥ ॥पुत्रवा
न्धनवान्लोके दीर्घायुरिह जायते॥ यं यं चिंतयते कामं
तं तं प्राप्नोत्यसंशयः॥२३॥ सर्वत्र जयमाप्नोति सर्व
त्र विजयी भवेत्॥ भुव्यंतरिक्षे दिव्यानां ग्रहाणां विनि
वारणं॥२४॥ वृश्चिकोरगसंभूतविषापहरणं परं॥ ब्र
ह्मराक्षसयक्षाणां दूराद्विद्रावकारणं॥२५॥ भूर्जे वाता

५

लपत्रे वा लिखितं कवचं शुभं॥ ॥करमूले धृतं येन
सिध्यस्तत्करे स्थिताः॥ नृसिंहकवचेनैव रक्षितो वज्र
रक्षितः॥२६॥ देवासुरमनुष्येषु स्वाग्रेयी विजयी भवेत्
॥एकसंध्यं द्विसंध्यं वा त्रिसंध्यं यः पठेन्नरः॥२८॥ प्रा
प्नोति परमारोग्यं विष्णुलोके महीयते॥ द्वात्रिंशतः स
हस्राणां पाठाच्छुद्धात्मनां नृणां॥ २९ ॥कवचस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यमंत्रस्यमंत्रसिधिः प्रजायते॥ अनेनमंत्रराजेनकृ
त्वाभस्माभिमंत्रितं॥ ३० ॥ तिलकं विन्यसेद्यस्यतस्य
ग्रहभयंहरेत्॥ त्रिवारंजाप्यमानस्तु पूतंवार्यभिमंत्रि
तं॥ ३१ ॥ पाययेद्यन्नरंमंत्री नृसिंहध्यानमाचरेत्॥
तस्यरोगाः प्रणश्यंतियेचास्युः कुक्षिसंभवाः॥ ३२ ॥ ६
किमत्रबहुनोक्तेन नृसिंहसदृशोभवेत्॥ मनसाचिं

तयेद्यस्तु तंतमाप्नोत्यसंशयः॥ ३३ ॥ इतिपरमरह
स्यसारमेतत्कवचंवरंपीठतीहभक्त्या॥ सभवतिधन
पुत्रधान्यभोगीतनुविगमेसमुपैतिनारसिंहं॥ ३४ ॥
मातानृसिंहश्चपितानृसिंहोभ्रातानृहश्चसखानृ
सिंहः॥ विद्यानृसिंहोद्रविणंनृसिंहः स्वामीनृसिंहः स
कलंनृसिंहः॥ ३५ ॥ इतोनृसिंहः परतोनृसिंहोयतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतो यामिततो नृसिंहः॥ नृसिंहदेवादपरं न किंचित् तस्मा
न्नृसिंहं शरणं प्रपद्ये॥ ३६ ॥ कुतो भीतिः कुतो मृत्युः
कुतस्तस्य दरिद्रता॥ मृत्युमृत्यूरमानाथो यस्य नाथो
नृकेसरी॥ ३७ ॥ भर्जनं भवबीजानां सर्जनं सुख
संपदा॥ त्रासनं यमदूतानां नृहरेर्नाम गर्जनं॥ ७
॥ ३८ ॥ इती श्री ब्रह्मांडपुराणे नृसिंहप्रादुर्भावि

प्रल्हादविरचितं लक्ष्मीनृसिंहकवचस्तोत्रं संपूर्णं॥
॥ श्रीअहोबललक्ष्मीनृसिंहार्पणमस्तु॥ ॥ छ॥
शके १७६५ शोभननामसंवत्सरजेष्ठवद्यत्रयोदशी
भानुवासरे नृसिंहकवचस्तोत्रं संपूर्णं॥ इदं पुस्तकं दा
मोदरदीक्षीतजोशीयाचे पुस्तक॥ छ॥ ॥ छ॥ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.09.19 11:15
,TRANSFERRED=2019/09/05 at 11:17:58
,PAGES=9
,TYPE=STD
,NAME=S0001652
,Book Name=M-558-NIRSINGH KAVACH STROT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection